देव्योदेवाश्चसद्भक्ता, मांसंखादन्ति नैव ते
हिंसया पापयज्ञाः स्यु, धर्मयज्ञा अहिंसया ॥ १२ ॥

अहिंसैव प्रभोर्धर्मो, हिंसायां धर्मशून्यता;
पशुपक्षिमनुष्याणां, दयायां धर्मउच्यते ॥ १३ ॥

पापमूलं मदोज्ञेयः पापं जीवोपपीडनात्;
परोपकारसन्मूलं, दयां चित्ते प्रधारय ॥ १४ ॥

धर्ममाता दयैवस्यात्, मातानाऽस्ति दयासमा
सात्त्विकयःऽस्ति दयादेवी, धर्मस्य जननी सदा ॥ १५ ॥

धर्मोत्पत्तिरहिंसातो, हिंसातः पापसंभवः
प्रेरणंवं प्रभोःमत्या, मनो ह्यत्सुरुयभावनः ॥ १६ ॥

आत्मशुद्धिरहिंसातः सर्वत्रसर्वदेहिनाम्
प्रभोप्राप्तिरहिंसात, आत्मासाक्षाद् भवेत्प्रभुः ॥१७॥

मनोवाक्कायतोहिंसां, त्यजन्तिसत्यसाधवः
रागद्वेषपरीणाम, एष हिंसाऽस्ति चाऽन्तरा ॥१८॥

क्रोधान्मानात्तथादंभा, ल्लोभाद्भयाच्चदेहिनः
स्याऽन्यहिंसांप्रकुर्वन्ति, व्रजन्तिभयसागरम् ॥१९॥

षट्कायजीववृन्दानां, रक्षकाः साधवः शुभाः
यान्तिमोक्षंदयावन्त स्तत्रकिञ्चिन्नसंशयः ॥२०॥

यस्यचित्तेदयानास्ति, तच्चित्ते न प्रभुर्वसेत्
यदाऽऽत्मनिदयावास, ईश्वरः सः प्रभुर्महान् ॥२१॥

वृक्षादीनांरक्षाकार्या, हिंसा कार्या न पक्षिणाम्
अनाथादिमनुष्याणां, पालनंपुण्यहेतवे ॥३४॥
वृक्षगवादिजीवानां, सुपयःभक्षजीवनम्:
मनुष्याणांभवन्त्येव, कुरु परोपकारताम् ॥३५॥
दयामैत्र्यादिसत्कर्म, कुरूपकारिणः प्रति:
धनसत्तादिभोगेन, कुःसिजीवदयांकुरु ॥३६॥
क्रोधेर्ष्यादिभावेन, हिंसां मा कुरुदेहिनाम्
देशराज्यादिलोभेन, हिंसां मा कुरुदेहिनाम् ॥३७॥
धर्मयुद्धादिमोहेन, हिंसां मा कुरु देहिनाम्:
वर्णधर्मादिमोहेन, हिंसां मा कुरु देहिनाम् ॥३८॥
देवीरूपादिपूजायां, विपेण पशुपक्षिणः
मानवाद्यैर्देवाग्रे, स्वादन्ति न पशून ब्रवम ॥३९॥
स्याद्वादधर्मो धर्मो, न धर्मो न भविष्यति:
स्याद्वादादिधर्मकार्ये, संगृहिताज्ञानतः ॥४०॥
सर्वहिंसाजनकादीनां, धर्मोऽस्ति परस्परम्:
सत्यानुगेन देशे च, दुःस्वराज्ञिपरस्परा ॥४१॥
स्वार्थसिद्धिप्रदानां, मानवैर्निजधर्मिणः
कृत्वा:मितिहिंसांहिंसा, मा कुरु धर्मतेजः ॥४२॥
भिन्नधर्मिजनान हत्वा, मा कुरुष्व स्वधर्मिणाम्:
कुर्विहिंसाप्रवर्त्तनम्, मत्र धर्मो न केवलः ॥४३॥
अहिंसामयं देवानां, सर्वजातीयधर्मिणाम्:
कर्त्तव्या अन्तःधर्मेण, नास्ति स्वान्यातिहिंसा ॥४४॥
दुर्युद्धस्वधर्मेषु, हिंसायुद्धिं मा कुरु
निजधर्मिस्वार्थिहिंसा, मा कुरुष्व स्वधर्म ॥४५॥

दयात ईश्वरमाप्ति, देयां ज्ञात्वां दयांकुरु
क्षुधार्तरोगिलोकानां, सेवां कुरुष्व भावतः ॥५८॥
दयातः सर्वदेवाःस्यु, र्मानवाः स्युर्हिंसया
दयातः पुण्यबन्धोऽस्ति, पापबन्धोऽस्ति हिंसया ॥५९॥
नाऽस्ति दयासमंराज्यं, नास्ति दयासमंधनम्
नाऽस्ति दयासमासक्ता, नाऽस्ति दयासमोनृपः ॥६०॥
अहिंसासत्यसाम्राज्य, मान्तरं विश्वशान्तिकृत्
प्राप्य नरा निजंराज्य,-मात्मिकंयान्तिभावतः ॥६१॥
नद्यः सरांसि सद्वृक्षाः कूपा मेघाश्च वापिकाः
दयावन्तोमनुष्याश्च परोपग्रहहेतवे ।।६२॥
अन्धपङ्ग्वादिलोकानां, रुग्णादिपशुपक्षिणाम्
धर्मशालादिकंसर्वं, प्रकर्तव्यं दयापरैः ॥६३॥
जलान्नवस्त्रसत्स्थानं, धैनाद्यैश्चदयापरैः
जनादीनां प्रकर्तव्या, सेवा मोक्षप्रदायिनी ॥६४॥
कपोतादेर्दयाकार्या,-वित्तयुद्ध्यादिमाधनैः
साहाय्यंच मनुष्याणां, कुरुस्वार्पणतः सदा ॥६५॥
रोगापत्तिनिमग्नाना, मशक्तानां सहापताम्
कुरुष्व सदयांधृत्वा,-मा प्रमादं कुरुष्व भोः ॥६६॥
रोगार्त्तदुःखिलोकानां, साहाय्यं कुरु शक्तितः
यस्य योग्यं च य त्सर्मं, तदेयं सदयापरैः ॥६७॥
ईश्वरप्रतिमाः सन्तो, दयोपकारकारिणः
पराऽऽत्मानो भवेयुस्ते, मोहादिकर्मनाशनः ॥६८॥
अहिंसया प्रजीवन्ति, धर्माः सर्वे जगत्स्थिताः
हिंसया नैवधर्मोऽस्ति, भाषितं जिनपुंगवैः ॥६९॥

सर्वारंभपरित्यागी, भवेत्साधुरहिंसकः
अतोगृहस्थनोत्यागी, ह्यनन्तगुणशुक्तिकृत् ॥८२॥
द्रव्यभावदयावन्तः साधवो धर्मदेशकाः
शीघ्रंमुक्तिपदंयान्ति, विश्वदयाप्रवर्त्तकाः ॥८३॥
कोटिकोटिमहोपायैः, धर्मिजीवस्यरक्षणम्
हिंसकेभ्यः प्रकर्त्तव्यं, सात्त्विकत्यागकर्मभिः ॥८४॥
अन्यायपापहिंसाऽस्ति, त्याग एव दयाशुभा;
कारणभेव हिंसाऽस्ति, निर्दम्भश्च दयाशुभा ॥८५॥
हिंसायां पापमत्यार, आप्ता हिंसानिषेधकाः
अज्ञानीविपरीतास्तु, हिंसाऽधारविचारिणः ॥८६॥
मांसमत्स्याण्डभोक्तारः पश्वादिप्राणिभोजनाः
अहिंस्या जनहन्तारो, राक्षसा जनरूपिणः ॥८७॥
जलस्थानां विनाशेन, जीवनैषणवन्ति ये;
धनकामेनविज्ञेया,-जनघातेनजीविनः ॥८८॥
सर्वहिंसाप्रचारार्थं, संतोऽपिनाशकैर्नरैः;
हिंसाप्रचारकर्त्तारो, मुख्या भावप्रणाशिनः ॥८९॥
सर्वदयावैःपिहिंसाऽस्ति, विश्वा हिंसास्वरूपिणी
अज्ञानभावेन हिंसाऽस्ति, हिंसाऽशुभफलप्रदा ॥९०॥
हिंसा विश्वासघातोऽस्ति, कृतघ्नाद्विप्रघातकः
कृतघ्नतापि हिंसैव, हिंसा मिथ्याप्रलापनम् ॥९१॥
हिंसा भूपाऽपि बोद्धव्या, परस्त्रीगामिकारणम्
निन्दाहिंसापि हिंसैव, मिथ्यात्ववृद्धिकारणा ॥९२॥
अज्ञानदर्शनंहिंसा, आत्मनो विषयौ महान्
आत्मद्वेषश्च हिंसैव, मोहाय सर्वनाशना ॥९३॥

पूर्णसाम्यदशापूर्वं दयायाः सत्यहेतुता;
ज्ञात्वापरोपकारार्थं योग्यां दयां समाचर ॥१०६॥
वीतरागाजिनाबुद्धा; सर्वज्ञाः परमेश्वराः
कृतकृत्याअपिव्यक्त,-दयाकार्यप्रवर्तका; ॥१०७॥
पापेनक्षीयतेपुण्यं, पापात्पापंविवर्धते
पुण्येन क्षीयते पापं, पुण्यात्पुण्यंविवर्धते ॥१०८॥
पुण्याद् धर्मस्य सम्प्राप्ति, र्धर्मान्मोक्षः प्रजायते
मोक्षेऽनन्तसुखं नित्यं, तस्मा दयां समाचर ॥१०९॥
निर्धनाश्चदयावन्तो, हिंसकचक्रवर्तिनः
कोटिगुणामहाश्रेष्ठा, जीवन्त ईश्वराः शुभाः ॥११०॥
यथाममप्रियाः प्राणा, स्तथैवसर्वदेहिनाम्
ज्ञात्वेतिसर्वजीवानां, प्राणान्रक्षविवेकतः ॥१११॥
मृत्युःप्रियो न कस्याऽपि, कीटादेश्चप्रवेदय
स्वस्याऽस्तिजीवनंप्रेय, स्तथाऽस्तिसर्वदेहिनाम् ॥११२॥
सौराष्ट्रेगुर्जरेकच्छे,-मरुधरे च मालवे;
दयाप्रयसुमाग्राज्यं, जैनादिभिःप्रवर्तते ॥११३॥
पशुपक्षिमनुष्याणां, धर्मशालादिकंभृशम्
कपोतपालिकायद्वन्यो, ग्रामेषनगरेपुरे ॥११४
कुमारपालभूपेन, दयाधर्मः प्रवर्धितः
वस्तुपालादिभिः श्रेष्ठैः दया भृशंप्रचारिता ॥११५॥
सर्वधर्मेषुमत्योऽस्मि, जैनधर्मोदयामयः
सर्वजानिद्रशाबुध्यै, जैनधर्मो विवर्धताम् ॥११६॥
सद्धर्मयस्वधर्मोऽस्ति, परधर्मोऽस्तिर्हिसनम्
दयाजयःप्रजीवन्तु, विश्वदयाप्रचारिणः ॥११७॥

पुलिंदपापसम्पोऽस्ति, देवो हिंसानिवारकः
पशुरक्तादिभोगानाम्, नेच्छति नच याचते ॥१३०॥
गजाश्वपशवोऽन्नेन, सुप्ता देवेन निर्मितम्
देवाः पशून् न खादन्ति, पिबन्ति रुधिरं न च ॥१३१॥
पशुरक्तादिर्पणैश्च, प्रसन्ना नैव देवताः
पापोदयेन रोगाश्च, दुःखानि विश्वदेहिनाम् ॥१३२॥
पापोदयेन रोगादि-दुःखंभवति देहिनाम्
पुण्योदयेन आरोग्य-सुखंभवतिनान्यथा ॥१३३॥
पापाद्दुःखं सुखं पुण्यात्, सर्वत्र सर्वदेहिनाम्
ज्ञात्वा च पुण्यकर्माणि, सद्भावपूर्वकेण न ! ॥१३४॥
सर्वदर्शनशास्त्राणां, दैविनामविचारिणाम्
मार्गदर्शकशुद्धानां, ह्यनुमानेन च सहसा ॥१३५॥
हिंसाऽहिंसाविवेकेन, पापपुण्यप्रकाशनात्
अहिंसाविवर्धिता, हिंसाऽपि पापिनांजने ॥१३६॥
अनादिकालतो हिंसा, गर्हणीयादिकर्मणः
कुमार्गादिर्दिनो दुःख,-निवारणानुकर्मणः ॥१३७॥
देवो हि न तु कस्यापि, पापाय सानिध्यकारकः
स्वर्गादिदर्शनकारिणां, आज्ञ हि प्रमाणे ॥१३८॥
स्वः हिंसादिपापतोऽपि, दुर्गतावतरणात्
आत्मनः पापकर्मैः ज्ञानेन स्वयमेव ॥१३९॥
धर्माधिकारिभिर्मान्यम्, हिंसाकर्माणि वर्जयेत् ॥
सर्वदर्शनप्रमाणम्, अहिंसा धर्म शास्त्र ॥१४०॥
देवाःहिंसाप्रियाः नैव, निष्कृपाः सन्त्यपि
देवाःहिंसाप्रिया सन्ति नैव नृणां आत्मनि ॥१४१॥

दशदृष्टान्ततोऽतीव–दुर्लभोनृभवोमहान्
प्राप्यस्वाऽऽत्मा भवेत् सिद्धो, दयादिधर्मसाधनैः ॥२०२॥
इति विज्ञाय भोभव्या, दयां कुर्वन्तु भावतः
प्रभुसदृग्मनुष्याणां, हिंसां त्यजन्तु मानवाः ॥२०३॥
अतिपापिमनुष्योऽपि, सम्यग्दृष्ट्यादिलाभतः
इहैवमोक्षमायाति–त्यक्त्वा हिंसादिकं क्षणम् ॥२०४॥
अतो मनुष्यघातात्त्वं, विरम कोट्युपायतः
आत्मज्ञानं मनुष्येभ्यो, देयं हिंसानिवारकम् ॥२०५॥
कोटिकोटिमहोपायै, र्मनुष्यसंघरक्षणम्
कर्त्तव्यं शिक्षणं देय, मर्हिसाचारवर्धकम् ॥२०६॥
अहिंसाचारतः शान्ति, र्देशेखण्डे प्रजासु च
राज्येषु भवति स्पष्टा, नान्योपाया भुवस्तले । २०७॥
इति निश्चित्यसिद्धान्तं, सर्वखण्डस्थमानवाः
दयाचारै र्विचारैश्च, प्रवर्तन्ते स्वभावतः ॥२०८॥
आत्मन्येव सुखं सत्यं, निश्चित्य भव्यमानवाः
बाह्यभोगाप्तये हिंसां, कुर्वन्तु नैव सज्जनाः ॥२०९॥
बाह्यभोगे सुखभ्रान्तिं, त्यक्त्वा सत्यसुखाप्तये
आत्मन्येव स्थिरीभूय, स्वाऽऽत्मानन्दरसी भव ॥२१०॥
स्वस्वधर्मस्यसत्यत्वं, कथ्यतेसर्वधर्मिभिः
किन्तुनात्र न सत्यत्व, मर्हिसाधर्ममन्तरा ॥२११॥
ब्रह्मचर्यमहिंसैव, परब्रह्मप्रदायकम्
द्रव्यतोभावतोब्रह्म,–चर्यशक्तिप्रदायकम् ॥२१२
दुःखिलोकदयाकार्या, दुःखनाशनकर्मभिः
औषधालयसंस्थानं, कार्यमुपाश्रयादिकम् ॥२१३॥

दशदृष्टान्ततोऽतीव-दुर्लभोनृभवोमहान्
प्राप्यस्वाऽऽत्मा भवेत् सिद्धो, दयादिधर्मसाधनैः ॥२०२॥
इति विज्ञाय भोभव्या, दयां कुर्वन्तु भावतः
प्रभुसदृग्मनुष्याणां, हिंसां त्यजन्तु मानवाः ॥२०३॥
अनिपापिमनुष्योऽपि, सम्यग्दृष्ट्यादिलाभतः
इहैवमोक्षमायाति-त्यक्त्वा हिंसादिकं क्षणम् ॥२०४॥
अतो मनुष्यघातात्त्वं, विरम कोट्युपायतः
आत्मज्ञानं मनुष्येभ्यो, देयं हिंसानिवारकम् ॥२०५॥
कोटिकोटिमहोपायं, मनुष्यसंघरक्षणम्
कर्तव्यं शिक्षणं देय, महिंसाचारवर्धकम् ॥२०६॥
अहिंसाचारतः शान्ति, र्देशेखण्डे प्रजासु च
राज्येषु भवति स्पष्टा, नान्योपाया भुवस्तले ॥२०७॥
इति निश्चित्यसिद्धान्तं, सर्वखण्डस्थमानवाः
दयाचारै र्विचारैश्च, प्रवर्तन्ते स्वभावतः ॥२०८॥
आत्मन्येव सुखं सत्यं, निश्चित्य भव्यमानवाः
पापभोगाप्तये हिंसां, कुर्वन्तु नैव सज्जनाः ॥२०९॥
पापभोगे सुखभ्रान्ति, त्यक्त्वा सत्यसुखाप्तये
आत्मन्येव स्थिरीभूय, स्वाऽऽत्मानन्दरसी भव ॥२१०॥
स्वस्वधर्मस्यसत्यत्वं, कथ्यतेसर्वधर्मिभिः
किन्तुतत्र न सत्यत्व, महिंसाधर्ममन्तरा ॥२११॥
ब्रह्मचर्यमहिंसैव, परब्रह्मप्रदायकम्
दुःखनोपायतोब्रह्म,-चर्यशक्तिप्रदायकम् ॥२१२
दुःखिलोकदयाकार्या, दुःखनाशनकर्मभिः
औषधाल्पधर्मस्थानं, कार्यंसुपाश्रयादिकम् ॥२१३॥

संसारकोटिदुःखानि, विश्वदयाविवृद्धये,
प्रवर्तन्तां सदा लोकाः साधवः सत्ययोगिनः ॥२२५॥
साधवः प्रभुवत्पूज्या, हिंसादिपापवर्जिनः
सेवाभक्तिश्च कर्तव्या, सार्हमार्धर्मियोगिनाम् ॥२२६॥
हिंस्रव्याघ्रादिनो रक्ष्याः क्षत्रियैः पशुमानवाः
क्षत्रियाणां स्वधर्मोऽस्ति, साधुब्राह्मणरक्षणम् ॥२२७॥
क्षत्रियाणां स्वधर्मोऽस्ति, गोसतीबालरक्षणम्
निरपराधिजीवानां, निःशस्त्राणां च रक्षणम् ॥२२८॥
क्षत्रियाणां च कर्तव्यं, न्यायात्मंवादिरक्षणम्
राज्यभूम्यादिसंरक्षा, घोरापराधिदण्डनम् ॥२२९॥
मृगयापापखेलादि,-हिंसाकर्मलजन्निते
अहिंसाधर्मिरक्षार्थ, क्षत्रिया उपयोगिनः ॥२३०॥
अहिंसाधर्मबोधार्थ, ब्राह्मणा उपयोगिनः
पशुमांसादिभोक्तारो, ब्राह्मणा अपि राक्षसाः ॥२३१॥
सुरामांसप्रहिंसाद्यै, ब्राह्मणानैवकर्मनः
दयासत्यादिधर्मैश्च, ब्राह्मणा धर्मिणः स्मृताः ॥२३२॥
गवांसंपालनाद्वैश्या, अहिंसाधर्मसाधकाः
पशुपालनकृष्यादि,-कर्मिणश्च दयालवः ॥२३३॥
व्यापारादिप्रवृत्तिषु, दयाबुद्ध्या प्रवर्तकाः
अहिंसाधर्मवृद्ध्यर्थ, धर्मशालादिकारिणः ॥२३४॥
भूपानां च स्वधर्मोऽस्ति, न्यायात् प्रजादिपालनम् ;
साधूनां च गवादीनां, रक्षणं हिंस्रदण्डनम् ॥२३५॥
धर्मिणां रक्षणंनीत्या, चोरापराधिदण्डनम्
अहिंसाधर्मिणोवृद्धिः कार्याच दोषवर्जनम् ॥२३६॥

[illegible] च [illegible], [illegible]
[illegible] [illegible] [illegible]. [illegible] [illegible] [illegible] [illegible] ॥ [illegible] ॥
आजीविकादिकार्येषु, [illegible] [illegible]
[illegible], [illegible] [illegible] ॥ [illegible] ॥
अहिंसा [illegible] [illegible], [illegible] [illegible]
[illegible], [illegible] [illegible] [illegible] ॥ [illegible] ॥
[illegible] [illegible], [illegible]
जीवन्ति [illegible] [illegible], [illegible] [illegible] ॥ [illegible] ॥
[illegible] [illegible] [illegible], [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] ॥ [illegible] ॥
[illegible] [illegible] [illegible], [illegible] [illegible] च [illegible]
[illegible] [illegible], [illegible] [illegible] च ॥ [illegible] ॥
[illegible] [illegible], [illegible] [illegible]
[illegible] [illegible], [illegible] च [illegible] ॥ [illegible] ॥
[illegible], [illegible] हि [illegible]
[illegible], [illegible] [illegible] [illegible] [illegible] ॥ [illegible] ॥
[illegible] [illegible], [illegible] [illegible] [illegible]
[illegible] [illegible], [illegible] [illegible] [illegible] ॥ [illegible] ॥
[illegible] हि [illegible], [illegible] [illegible] [illegible]
[illegible], [illegible] [illegible] ॥ [illegible] ॥
[illegible], [illegible] [illegible]
[illegible] [illegible], [illegible] ॥ [illegible] ॥
[illegible], [illegible] [illegible]
[illegible] [illegible] हि, [illegible] [illegible] [illegible] ॥ [illegible] ॥

हिंसाऽस्ति च्यमर्नवोर्रः हिंसादुर्गुणवृत्तयः
सर्व हिंसादितो मुक्ता, वीतरागा जिनादयः ॥२४९॥
सर्वकर्मसु हिंसाल्प, मल्पाधिक्यप्रभेदतः
गृहस्थानां भवेत्तत्र, निर्ग्रन्था ज्ञानयोगिनः ॥२५०॥
दयाबुद्धिं हृदि न्यस्य, गृहस्था स्त्यागिनो जनाः
स्वाऽधिकारेण कर्माणि, कुर्वन्ति स्वोपयोगिनः ॥२५१॥
यथा धूमाघ्नो वह्नि, स्तथा सर्वप्रवृत्तयः
सदोषा अपि कुर्वन्ति, ह्याजीविकादिकारिणः ॥२५२॥
निरासक्तितया सुज्ञा, यथायोग्यविवेकतः
आत्मज्ञानोपयोगेन, कर्म कुर्वन्ति सज्जनाः ॥२५३॥
द्रव्यभावदयाज्ञान,-विवेकेन प्रवर्तिनः
स्वाऽधिकारेण कर्माणि, कुर्वन्ति यान्ति सद्गतिम् ॥२५४॥
हिंसाबुद्धिर्न यस्याऽस्ति, शुद्धाऽऽत्मलक्ष्यधारकः
सर्वकर्मप्रकुर्वाणोऽप्यहिंसाधर्मसाधकः ॥२५५॥
परस्परं च साहाय्यं, कुर्वन्तु भव्यमानवाः
परस्परोपकारेण, जीवा जीवन्ति भूतले ॥२५६॥
परस्परोपकारोऽस्ति, जीवैर्जडैश्चदेहिनाम्
परस्परसहायेन, जीवन्ति विश्वदेहिनः ॥२५७॥
अतःस्वाभाविकं सत्यं, साहाय्यं च परस्परम्
विज्ञायैवं जनाः सर्वे, भवन्तु स्वार्पिताः सदा ॥२५८॥
दुःखिनां दुःखनाशार्थं, सहायिनो भवन्तु भोः
स्वार्थेण कातरा नैव, भवन्तु विश्वमानवाः ॥२५९॥
देशजात्यभिमानेन, वर्णधर्माभिमानतः
परस्परं न हिंसन्तु, भवन्तु सदयापराः ॥२६०॥

क्रीडाभिलाषसंसर्गेण, राज्यसत्तादिसंभवः
विषयासक्तादिदर्पेण, नाशयन्तु न हिंसकाः ॥१६१॥
राजानो राज्यगर्वेण, पीडयन्तु न हिंसकाः
हिंसादिपापदोषेभ्यः, त्यजन्तु धर्मयुक्तितः ॥१६२॥
राज्यं कुर्वन्तु सद्युक्त्या, सर्वलोकहिताय च
अन्यायं नैव कुर्वन्तु, सन्तु हिंसानिवारकाः ॥१६३॥
क्षत्रिया ब्राह्मणा वैश्याः शूद्राश्च निजधर्मतः
आत्मनः शुद्धिकृत्यार्थं, सन्तु दयाकराः ॥१६४॥
निजधर्मादिसंयोगेन, दुःखितानां निवारणम्
दुःखनाशाय सद्धर्मं, धर्मिणो निजकर्म च ॥१६५॥
पशूनां पक्षिणां दुःखं,-नाशार्थं च यथाक्रमम्
भवन्तु सदयाकराः,-धर्मिणो निजकर्मणा ॥१६६॥
दयाधर्मादिविचारेणा, धार्मिका जनाः सर्वेषु वै
सर्वेषां हितकर्तारः, भवेत् भावदयामयाः ॥१६७॥
अहिंसाधर्मनिर्मितौ, धर्मेषु सर्वधर्मेषु
धर्मादिसर्वधर्माणां, धर्मो मैत्र मुख्यकं ॥१६८॥
अहिंसाधर्मसंपूर्णं, धार्मिकाः सन्तु सादराः
अहिंसायाः परो धर्मः, नास्ति सत्यं न संशयः ॥१६९॥
अहिंसा सर्वधर्माणां, श्रेष्ठोऽस्ति धर्मकेषु
सर्वधर्मेषु वा श्रेष्ठं, दयाधर्मविचारतः ॥१७०॥
दयाहेतोः परित्यज्य, सर्वदुःखाद्यनर्थकम्
जैनेषु वैदिकेष्वपि, दयाधर्मः प्रकाशते ॥१७१॥
दया मैत्र सर्वधर्मे, जैना आर्याः दयार्थिनः
आर्यावर्तादिसर्वेषु, दयाधर्मोऽस्ति ॥१७२॥

सर्वखण्डेषुदेशेषु, दयाऽऽचार्यैः प्रवर्ध्यते
अहिंसाधर्मिणांसत्य, मार्यत्वंगुणकर्मतः ॥२७३॥
मदिरामांसतोदूरा, आर्याःस्युर्गुणकर्मतः
अनार्यम्लेच्छलोकानां, हिंसात्वं वृत्तिकर्मतः ॥२७४॥
सृष्टिविरोधकं कर्म, हस्तकर्मादिकं च यत्;
बाललग्नादिकंहिंसा, त्याज्या धर्मार्थिकामिभिः ॥२७५॥
अतिशोकादिकं हिंसा, ज्ञातव्या च विवेकिभिः
मनोवाक्कायशक्तीनां, रक्षणं सदया मता ॥२७६॥
अत्याहारैस्तु हिंसैव, चातिवादश्च हिंसनम्
मनोवाक्काययोगाना, मनियत्न श्च हिंसनम् ॥२७७॥
कूपादिपतनं हिंसा, विषादिभक्षणं तथा;
अतिपरिश्रमोहिंसा, ज्ञातव्यैवं विवेकतः ॥२७८॥
आर्तरौद्रविचाराणां, हिंसाऽस्ति कर्मबन्धनात्
धर्मशुक्लविचाराणां, स्वाऽऽत्मदयाऽस्तिवस्तुतः ॥२७९॥
स्वाऽऽत्मनो या दया सैव, चाऽन्यसर्वदयादितः
अस्त्यनन्तगुणैः श्रेष्ठा, सर्वकर्मविनाशिनी ॥२८०॥
दर्शनज्ञानचारित्र, महिंसैव स्वभावतः
शुद्धोपयोग एवाऽस्ति, ह्यहिंसा च निजाऽऽत्मनः ॥२८१॥
अहिंसा त्रिविधा ख्याता, तामसी राजसी तथा
सात्त्विकी स्वाऽऽत्मशुद्ध्यर्थं, श्रेष्ठाऽस्ति चोत्तरोत्तरा॥२८२॥
सुतरां सात्त्विकी भव्यैः कर्तव्या स्वोपयोगतः
निष्कामबुद्धिभिः कार्यं, महिंसाकर्म सात्त्विकम् ॥२८३॥
हिंसा त्रिधाऽस्तिविज्ञेया, तामसी राजसी तथा;
सात्त्विकी च परित्याज्या, स्वाऽधिकारेण मानवैः ॥२८४॥

महेंद्रगुरुधर्मार्थं, संघार्थं च महाजनैः
अल्पदोषमहाधर्म,-कर्म कार्यं यथातथम् ॥२८५॥
वनस्पतिफलाहारात्, सत्त्ववुद्धिः प्रकाशते
सात्त्विकपानयोगेन, शुद्धबुद्धिः प्रकाशते ॥२८६॥
सात्त्विकभोजनाच्छुद्धि,-श्चित्तस्य प्रविजायते
स्वच्छवायुजलाद्यैश्च, दयावृत्ति विवर्धते ॥२८७॥
अहिंसाधर्मिणां सङ्गाद्, दयाबुद्धिः प्रजायते
द्रव्यभावदयायोगात्, स्वाऽऽत्मा सिद्धः प्रजायते ॥२८८॥
पवित्रभूमिवासेन, दयाबुद्धिः प्रवर्धते
पवित्रतीर्थवासेन, सद्दया हृदि जायते ॥२८९॥
चण्डकौशिकनागे च, कृताऽपराधिसंगमे;
महावीरस्य नेत्रे द्वे, दयार्द्रे कुरुतां शिवम् ॥२९०॥
यस्य पूर्णदयादृष्टिः कमठेऽप्यपराधिनि
ध्यानावस्थास्थितो देवः पार्श्वनाथः श्रियेऽस्तु वः ॥२९१॥
मृगवृन्दोपरिप्रीतिः सद्दया येन धारिता
अरिष्ठनेमिभगवान्, कल्याणं कुरु सत्वरम् ॥२९२॥
कपोतस्य कृता रक्षा, पूर्वजन्मनि भावतः
सर्वविघ्नस्यशान्त्यर्थं, शान्तिनाथोऽस्तु सर्वदा ॥२९३॥
भारतादिकदेशेषु, दयाधर्मप्रवृद्धये
साधवः प्रेषिता येन, पशुशालाः कृता घनाः ॥२९४॥
अशोकभूपपौत्रेण, जैनसम्प्रतिभूभुजा;
चन्द्रगुप्तेन भूपेन, दया सर्वत्र वर्धिता ॥२९५॥
वस्तुपालो महामन्त्री, तेजःपालोऽपिगुर्जरे
जातौ दयाप्रचारार्थं, धामरौ जैनधर्मिणौ ॥२९६॥

दुष्काले कच्छसौराष्ट्र,-गुर्जरादिषु मानवाः
रक्षिता अन्नदानेन, जगडूशादयालुना ॥२९७॥
इलादुर्गमहाश्रेष्ठो, दुष्काले सर्वरक्षकः
अंबावीदासजैनोऽभूत्, तस्याऽस्ति कीर्तिरुत्तमा ॥२९८॥
मंडपे पेथडश्रेष्ठी, जैनो बभूव धर्मवान्
क्षुधार्तादिमनुष्येभ्यो, भोजनार्थं च दत्तवान् ॥२९९॥
अशोको भूपतिः श्रेष्ठः सर्वभूपतिशेखरः
तेन दयासमुद्रेण, देशाहिंसा निवारिता ॥३००॥
खारवेलेन भूपेन, भारते वर्धिता दया;
सिद्धसेनोपदेशेन, विक्रमेण दया तता ॥३०१॥
अहिंसा स्थापिता राज्ये, दयामयेन चेतसा
स आमभूपतिः श्रेष्ठो, बभूव जैनधर्मिराट् ॥३०२॥
अकबरबादशाहेन, भारतदेशचक्रिणा
आर्याणां प्रेमवृद्ध्यर्थं, गवां हिंसा निवारिता ॥३०३॥
हीरविजयसूरीणां, प्रबोधैर्नवसद्दया
यस्याऽऽत्मनि भृशं जाता, सोऽकबरः कीर्तिमान्श्रुतः ॥३०४॥
यस्य विश्वोपरि प्रेम, तस्य व्यापकसद्दया,
दयाहिंसास्वरूपं तु, ज्ञानी जानाति वस्तुतः ॥३०५॥
ज्ञानं पूर्वं दया पश्चात्, नाऽस्ति ज्ञानं विना दया
ज्ञानी ज्ञानेन जानाति, दयां हिंसां च वस्तुतः ॥३०६॥
काययोगेन हिंसा तु, केवलिनामपि भवेत्
द्रव्यहिंसाऽस्ति सादेहान, न तु भावेन विन्दत ॥३०७॥
रागद्वेषपरीणामा, हिंसाऽस्ति भावतःस्वतु
रागद्वेषपरीणामं, विना नास्ति हि भावतः ॥३०८॥

भावहिंसां विना द्रव्य,-हिंसया भवबन्धनम्
नाऽस्ति तत्तु परिज्ञाय, भवन्तु स्वोपयोगिनः ॥३०९॥
कर्मबन्धनमुक्त्यर्थं, माऽऽत्मन स्त्वं दयां कुरु
आत्मज्ञानेन स्वाऽन्यानां, दया सत्या प्रकाशते ॥३१०॥
दयां हिंसां न जानाति, मिथ्यादृष्टिरबोधतः
दयां हिंसां च जानाति, सम्यग्दृष्टिः सुबोधतः ॥३११॥
सम्यग्ज्ञानी विजानाति, दयां हिंसां च युक्तिः
युक्त्र दयाप्यहिंसा स्यात्, हिंसाऽपि कुत्रचिद्दया ॥३१२॥
कुत्रचिद्दयायतोर्हिंसा, काययोगेन संभवेत्,
तथापि भक्तिसेवार्थं, रहिंसा चान्तरा यतः ॥३१३॥
सद्देवगुरुसंघस्य, रक्षणार्थं च चात्मनः
दोषे सति महाधर्मो, जायन्ते बहुनिर्जराः ॥३१४॥
कायेन नैव हिंसाऽपि, रागद्वेषादिमोहतः
मानसिका भवेद्धिंसा, चाऽन्यथानविचारतः ॥३१५॥
आन्तरा भावहिंसाऽस्ति, द्रव्यहिंसा तु बाह्यतः
गीतार्थगुरुबोधेन, स्वाऽधिकारा दयां कुरु ॥३१६॥
प्रमादयोगतो हिंसा, स्वाऽन्यप्राणविनाशनात्
हिंसाया लक्षणं प्रोक्तं, तत्त्वार्थसूत्रभाषिनम् ॥३१७॥
सम्यग्दृष्टियुता जैनाः सम्यग्दृष्टिगुणस्थिताः
अविरताश्च हिंसार्थं, रहिंसादिमकांक्षिणः ॥३१८॥
हिंसादौ दोषमन्तारो, हिंसादिदोषहानये
उद्युक्ता हि दयादृनां, रक्षार्थं ते प्रवर्त्तकाः ॥३१९॥
अणुव्रतधरा जैनाः श्रावका द्रव्यभावतः
अणुभङ्गेन जीवानां, निरपराधिदेहिनाम् ॥३२०॥

स्थूलानां हिंसका नैव, स्थूलहिंसाविरामिणः
औत्सर्गिकापवादाभ्यां, सापेक्षव्रतधारिणः ॥३२१॥
सद्देवगुरुधर्माणां, संघस्य भक्तिहेतवे
सेवार्थं तस्य रक्षार्थं, मौत्सर्गिकाऽपवादिनः ॥३२२॥
भक्त्यादिधर्मकार्येषु, हिंसातः कर्मबन्धनम्
स्वल्पं च निर्जरा बह्व्यो, महापुण्यं प्रजायते ॥३२३॥
अतोगृहस्थिताः श्राद्धा, द्विविधाः स्वाऽधिकारतः
देवादिभक्तिरक्षादौ, प्रवर्त्तन्ते यथातथम् ॥३२४॥
महाव्रतधराः सन्तो, मुक्ता हिंसादिपापतः
साधवो विश्वजीवानां, त्रातारः सन्ति बन्धवः ॥३२५॥
औत्सर्गिकाऽपवादाभ्यां, धर्मसंघादिरक्षणे
विश्वलोकदयार्थं, प्रवर्त्तन्ते यथातथम् ॥३२६॥
द्रव्यभावदयावन्तः षट्कायजीवपालकाः
निर्दोषाऽऽहारपानेन, जीवन्ति च यथातथम् ॥३२७॥
गृहस्थत्यागिभेदेन, द्विधाधर्मोऽनादितः
सर्वज्ञबोधिनः सत्यो, जैनधर्मः प्रवर्त्तते ॥३२८॥
द्रव्यभावीयहिंसातो, विरतिश्च भवेद्यथा
तथा प्रवर्त्तनं कार्यं, द्रव्यभावदयापरैः ॥३२९॥
दर्शनज्ञानचारित्र,-मोक्षमार्गानुसारिभिः
गृहस्थैस्त्यागिभिर्हिंसा, संत्याज्या च यथातथम् ॥३३०॥
सर्वविश्वस्थपालानां, विद्याशालासु मानवैः
अहिंसाधर्मशिक्षार्थ,-वर्तितव्यं यथातथम् ॥३३१॥
हिंसकानां प्रबोधार्थं, सर्वविश्वेषु वर्तिनाम्
सर्वजातिप्रबन्धेन, वर्तितव्यं दयालुभिः ॥३३२॥

पापहिंसा भवेत्ताप-स्तान्तिराऽऽत्मनां ध्रुवम्
अहिंसावृत्तिकर्मभ्यः, शान्तिःशर्म शिवं भवेत् ॥३३३॥

आत्मनः सदया श्रद्धा, प्रामाण्यवृत्तिकर्मभिः
हिंसा निजाऽऽत्मनो ज्ञेया, प्रामाण्यभ्रष्टजीवनात् ॥३३४॥

औदार्यसत्यगाम्भीर्यात्, दया सत्या प्रवर्तते
सर्वलोकसहायेन, दयाधर्मो विवर्धते ॥४३५॥

सर्वत्रप्रस्थलोकानां, रोगदुःखादिनाशने
परस्परसहायार्थं, प्रियन्ते भव्यमानवाः ॥३३६॥

आत्मशुद्धोपयोगेन, कृतेषु सर्वकर्मसु
अहिंसा शान्तरा सत्या, वर्त्तते ज्ञानयोगिनाम् ॥३३७॥

ज्ञाने सत्यसमाधिश्च, सदैव सतां सदा
शुद्धोपयोगतः सत्या, वर्तते धर्मिणां दया ॥३३८॥

मनोवाक्कायशुद्धानां द्रव्यभावेन सदया
आत्मनः पूर्णशुद्धयर्थं, हेतुभूता प्रवर्तते ॥३३९॥

पापहिंसापरिणाम-स्याद्दयाविचारणा
हिंसावृत्तिदयावृत्योः, शुद्धाऽऽत्मा हि पृथग्भवेत् ॥३४०॥

हिंसावृत्तेः क्षयार्थं हि, दयावृत्तेः प्रयोजनम्
शुद्धोपयोगिनो द्वाभ्यां, स्वं जानन्ति पृथक् ततः ॥३४१॥

कृतकृत्याश्च सर्वज्ञा, दयाचारप्रपालकाः
पोषयन्ति दयाधर्मं, तस्माद्दयां समाचर ॥३४२॥

सदयैव मनः स्वर्गः क्रूरत्वं श्वभ्रमेव च
स्वर्गश्वभ्रपरिज्ञाय-दयाकर्म कुरुष्व भोः ॥३४३॥

गोमहिष्यादिरक्षार्थं, विश्वस्थसर्वमानवैः
कर्तव्यस्वार्पणंपूर्णं, वित्तदेहादिभिर्भृशम् ॥३४४॥

मांसाहारेण देहस्य, पुष्टिं जानन्ति केचन
मांसं भुञ्जन्ति पश्वादे-र्निर्दया हिंसका जनाः ॥३४५॥
मांसाहारेण लोकानां, दीर्घायुर्नैव जायते
नश्यति सात्त्विकीबुद्धि-र्देहाऽऽरोग्यं न तात्त्विकम् ।३४६
तामसवृत्तिदोषाःस्यु-र्मांसरक्तादिभोजिनाम्
अतिकामादिदोषैश्च, पापराशिपरम्परा ॥३४७॥
मांसाहारिमनुष्याणां, देहपुष्टिर्न तात्त्विकी
फलान्नदुग्धभोक्तॄणां, दीर्घायुः सात्त्विकी मतिः ॥३४८॥
मांसमद्यादिभोगेन, धर्मबुद्धिः प्रणश्यति
बहुरोगाः प्रजायन्ते, भवन्ति दुर्गुणा भृशम् ॥३४९॥
जिह्वास्वादस्य लाम्पट्याद्, देहपुष्टिप्रमोहतः
मांसं भुञ्जन्ति ते पाप-कर्म बध्नन्ति दुःखदम् ॥३५०॥
किञ्चित्सुखं महापापं, पश्वादिमांसभोजिनाम्
इतिविज्ञाय मांसस्य, त्यागं कुर्वन्तु मानवाः ॥३५१॥
पश्वादिहिंसनाल्लोका, विरमन्तु दयापराः
प्रेमतःस्वाऽऽत्मवज्जीवान्, रक्षन्तु धर्मिमानवाः ॥३५२॥
शुद्धोपयोग एवाऽस्ति, चाऽहिंसासंयमस्तथा
ज्ञानंध्यानमहिंसैव, भक्तिसेवाऽस्ति चान्तरा ॥३५३॥
आत्मनः शुद्धभावेन, ह्यहिंसा वस्तुतो भवेत्
आत्मोपयोगसामर्थ्या-ज्ज्ञानी निर्हिंसको ध्रुवम् ॥३५४॥
यज्ञार्थपशवःसृष्टा-इतिमिथ्याप्रलापनम्
दयाब्धिरीश्वरः प्रोक्तः, स हिंसां नैव भाषते ॥३५५॥
पशुपक्ष्यादिकं सृष्टं, नृणां भक्षणहेतवे
प्रभुणेति प्रभाषन्ते, हिंस्त्रा अनार्यपापिनः ॥३५६॥

दयालुरीश्वरोज्ञेयः, समः सर्वत्र देहिषु
विश्वजीवपिता नैवं, ब्रूयाद्धिंसावचो यतः ॥३५७॥
सयज्ञा भक्तिसेवाद्याः, पशुहिंसाविवर्जिताः
गवादिपशुलोकानां, रक्षैव यज्ञमर्म वै ॥३५८॥
सद्देवगुरुसाधूनां, पूजाऽन्नपानकर्मभिः
क्षुधार्तानां तृषार्त्तानां, सेवायज्ञः प्रकीर्तितः ॥३५९॥
ज्ञानंतपोदमोदाने, यज्ञाश्च बहुधा मताः
सद्दयां प्रतिगच्छन्ति, सत्ययज्ञाःस्वभावतः ॥३६०॥
सर्वविश्वस्थलोकानां, हितार्थं याः प्रवृत्तयः
शुभायज्ञाश्च शुद्धा हि, शुद्धोपयोगवृत्तयः ॥३६१॥
आत्मवत्सर्वजीवानां, हिंसा दुःखप्रदायिनी
आत्मवत्सर्वजीवानां, दया शान्तिप्रदायिनी ॥३६२॥
आत्मवत्सर्वजीवानां, जीवनेच्छा प्रवर्तते
स्वाऽऽत्मनो मृत्युवद्भीतिः, सर्वेषां भीतिरुच्यते ३६३॥
यथा मम प्रियो देह-स्तथा सर्वा ऽऽत्मनां खलु
ज्ञात्वैवं सर्वजीवानां, यथायोग्यं दयां कुरु ॥३६४॥
पशून् हत्वा च ये यज्ञे, प्रापयन्ति पशवो दिवम्
गच्छन्त्येवैमहामिथ्या-वादका मोहदुर्जयः ॥३६५॥
यज्ञहोमेन यःस्वर्गं, नीयन्ते पशवश्चतेः
हत्वा पुत्रादिकं स्वीयं, स्वर्गं न गमयन्तिकिम् ॥३६६॥
अयोग्यलग्नकर्मादि, मिथ्याऽधर्म्यकुरीतयः
अधर्म्यमैथुनं हिंसा, देहवीर्यस्य दुर्व्ययः ॥३६७॥
वैराकधर्म्यशास्त्रादृ, विरुद्धमतिमैथुनम्
स्वाऽन्यघाताघरोगास्त-द्धिंसैव ज्ञानिसम्मतम् ॥३६८॥

मनोवाक्कायहिंसादि,–कारकं कर्म यच्च तत्
हिंसां ज्ञात्वैव तत्त्याज्यं, सर्वखण्डस्थमानवैः ॥३६९॥
अधर्म्यैकामदोषादि–वृद्धि कृत्कर्म यद्भवेत्
तत्त हिंसां प्रविज्ञाय, त्यजन्तु सद्दयालवः ॥३७०॥
कन्याविक्रयतो हिंसा, वरविक्रयतस्तथा
आत्महत्या महाहिंसा, सत्यज्ञानं दयाकरम् ॥३७१॥
हिंसा बन्धाय विज्ञेया, चाऽहिंसा स्वाऽऽत्ममुक्तये
हिंसा दुःखाय विज्ञेया, चाऽऽत्मानन्दाय सद्दया ॥३७२॥
दयादानादितः पुण्य–कर्मबन्धो भवेत्खलु
पुण्याद् धर्मस्य सामग्री, प्राप्यते पुण्यकर्मभिः ॥३७३॥
शुद्धवायुर्जलं शुद्धं, स्थानं सात्त्विकभोजनम्
योग्याहारो विहारश्च, दुष्टव्यसनवर्जनम् ॥३७४॥
प्रकाशो मृत्तिका शुद्धा, भोजनं फलदुग्धयोः
देहवीर्यस्य संरक्षा, दीर्घायुर्हेतवः स्मृताः ॥३७५॥
ज्ञात्वैवं धर्मिभिश्चाधि–व्याधिवर्जनहेतवे
दयावद्भिर्जगल्लोकाः कर्तव्या दीर्घजीविनः ॥३७६॥
स्वाऽऽत्मदया प्रकर्तव्या, दयावद्भिर्विवेकतः
मद्यमादकपेयादि–त्यागेनभव्यमानवैः ॥३७७॥
दीर्घायुः साधनं सर्वं, दयैव धर्महेतवे
विज्ञायैवं च संसाध्यं, दीर्घायुर्जीवनं निजम् ॥३७८॥
स्वस्य धर्मस्य मोहेन, चाऽशुभमन्यधर्मिणाम्
चिन्तितं च कृतं तद्धि. निन्दामि सत्यभावतः ॥३७९॥
स्वाऽन्यव्याधिविनाशाय, स्वाऽन्याधिनाशहेतवे
स्वान्योपाधिनिवृत्त्यर्थं, सत्कर्म तद्दया भृशम् ॥३८०॥

निरुपाधिदशावांश्च, व्याध्याधिवर्जितो नरः
दीर्घायुष्मान् भवत्येव, शुद्धब्रह्माऽधिकारवान् ॥३८१॥
आजन्मब्रह्मचर्येण, दीर्घायुर्धारको भवेत्
मद्यमांसपरित्यागाद्, दीर्घजीवी भवेन्नरः ॥३८२॥
मनोवाक्काययोगानां, दीर्घजीवनहेतवः
ते दयार्थं प्रविज्ञाय, दया साध्या दयालुभिः ॥३८३॥
वित्तदेहादिभोगेन, दयाधर्मैकतत्परैः
व्याख्यानादिप्रयत्नेन, यतितव्यं विवेकतः ॥३८४॥
पश्चात्तापादिभावेन, प्रायश्चित्तेन मानवाः
हिंसादिपापतः शुद्धा, भवन्ति च दयोद्यताः ॥३८५॥
पक्षपातादिमोहेन, देशनीत्यादिरीतयः
मनुष्यैः कल्पितास्तत्र, हिंसादिदोषसंभवः ॥३८६॥
क्षुत्तृड्रोगादियुक्तानां, दुःखिनो दुःखनाशने
अर्पिता वाङ्मनःकायै-र्देवास्ते देहधारिणः ॥३८७॥
बाह्याऽभ्यन्तरदुःखानां, नाशाय सर्वदेहिनाम्
द्रव्यभावदयार्थं, प्रवृत्ता स्तेसुरोत्तमाः ॥३८८॥
कारुण्यभावनाधारै-र्जीवन्ति जीविनो हि ते
हिंसाचारविचारैर्ये, जीवन्ति ते मृताः खलु ॥३८९॥
दयार्थं मनो वाणी, काया वित्तं च यस्य ते
जीवन्तु देवरूपास्ते, विश्ववत्सलसज्जनाः ॥३९०॥
यदायदा हि विश्वस्मिन्, भृशं हिंसा प्रजायते
तदातदा प्रजायन्ते, दयावन्तो जिनादयः ॥३९१॥
हिंसादिपापनाशार्थ-महिंसादिप्रवृद्धये
मोहारिशक्तिनाशाय, प्रभवन्ति जिनेश्वराः ॥३९२॥

यदा यदा दयाख्यानां, प्राबल्यं क्षीयते तदा
खण्डदेशे च जायन्ते, महासन्तो दयालवः ॥३९३॥

युगमुख्याश्च जायन्ते, सूरयो धर्मधारिणः
आत्मसामर्थ्यतो विश्व–दयासत्यप्रचारिणः ॥३९४॥

येषां चित्ते दया नास्ति, दुःखिनामवलोकनात्
जीवन्तो राक्षसा ज्ञेया, अशुभा जीवितोऽपि ते ॥३९५॥

दुःखिनो देहिनो दृष्ट्वा, तद्दुःखनाशनोत्सुकाः
जीवन्तस्ते शुभा ज्ञेया–देवा देहावतारिणः ॥३९६॥

वीतरागमनुष्यैर्हि–दया सत्या प्रकाश्यते
सम्यग्ज्ञानेन कर्तव्य–महिंसाकर्म मानवैः ॥३९७॥

नाऽस्ति हिंसासमं पापं, नाऽस्तिधर्मो दयासमः
नाऽस्ति ज्ञानसमं दानं, तपो नास्ति क्षमासमम् ॥३९८॥

लब्ध्वा मनुष्यजन्माऽपि, दयाधर्मो न धारितः
हारितं जन्म तेनैव, ज्ञात्वा दयां समाचर ॥३९९॥

दयोपदेशं विज्ञाय, यथाशक्ति दयां कुरु
कुरुष्व मा प्रमादं भोः, जागृहि हृदि सत्वरम् ॥४००॥

दुर्लभं दयाख्यानै–र्नृजन्म सर्वजन्मसु
संप्राप्य जीव मा मुह, दयाधर्मं समाचर ॥४०१॥

दयाधर्मविचारेण, सर्वविश्वं दयामयम्
सन्तु परोपकारार्थं, विश्वर्षिकप्रभुतयः ॥४०२॥

हिंसापापविचाराश्च, नश्यन्तु सर्वविश्वतः
सन्तु शान्तिमयं विश्वं, प्रभवन्तु दयाश्रयः ॥४०३॥

राजानो मन्त्रिणः श्रेष्ठाः, सन्तु वीरा दयालवः
सर्वविश्वप्रशान्त्यर्थं, दयाधर्मः प्रवर्तताम् ॥४०४॥

अनुक्रमो न पद्यानां, दयाग्रन्थे कृतो मया
पुनर्दोषो न पद्येषु, सद्दया परिणामतः ॥४१८॥
मनोवाक्कायतो हिंसा, कृता कारापिता मया
मिथ्या भवतु तत्सर्वा, दयाग्रन्थे कृते सति ॥४१९॥
मोहेन ह्यद्यपर्यन्तं, हिंसाकर्म कृतं मया
हिंसादिपापनाशोऽस्तु, कृतग्रन्थफलेन च ॥४२०॥
शरयुग्माऽधिकैः पद्यै-श्चतुः शतैर्दयाकरः
दयाग्रन्थः कृतोविश्व-लोकानां शान्तिकारकः ॥४२१॥
श्वपालस्य कृता पीडा, मया तत्पापशुद्धये
मायश्चित्तं कृतं पूर्णं, दयाग्रन्थे कृते शुभे ॥४२२॥
अहिंसाधर्मसद्बुद्ध्या, दयाग्रन्थे कृते सति
विश्वस्मिन्सर्वलोकेषु, दयाबुद्धिः प्रवर्धताम् ॥४२३॥
सर्वविश्वस्थलोकानां, दयाचारविवृद्धये
दयया विश्वशान्त्यर्थं, दयाग्रन्थः प्रकाशताम् ॥४२४॥
खसिद्धिग्रहचन्द्राङ्के (१९८०) मिते वैक्रमवत्सरे
मार्गशुक्लद्वितायायां, रवौ हि शुभभावतः ॥४२५॥
कृतः पूर्णो दयाग्रन्थो, बुद्धिसागरसूरिणा
मया च तद्दिने प्रीत्या, घंटाकर्णस्य मन्दिरे ॥४२६॥
घंटाकर्णस्य वीरस्य, प्रतिष्ठा च कृता मया
मधुपुर्यां (महुडी) स्थितिं कृत्वा, बुद्धिसागरसूरिणा॥४२७॥
शमोऽस्तु सर्वविश्वस्य, दयाधर्मस्य सद्बलात्
शान्तिस्तुष्टिश्च पुष्टिश्च, भवन्तु सर्वदेहिनाम् ॥४२८॥
ॐ अर्हश्रीमहावीरः, सर्वज्ञः परमेश्वरः
दयासत्यप्रचारेण, कुर्यां विश्वस्य मङ्गलम् ॥४२९॥

ॐ अर्हंमहावीर शान्तिः३

अनुक्रमो न पद्यानां, दयाग्रन्थे कृतो मया
पुनर्दोषो न पद्येषु, सहृदया परिणामतः ॥४१८॥
मनोवाक्कायतो हिंसा, कृता कारापिता मया
मिथ्या भवतु तत्सर्वा, दयाग्रन्थे कृते सति ॥४१९॥
मोहेन ह्यद्यपर्यन्तं, हिंसाकर्म कृतं मया
हिंसादिपापनाशोऽस्तु, कृतग्रन्थफलेन च ॥४२०॥
शरयुग्माऽधिकैः पद्यैश्चतुःशतैर्दयाकरः
दयाग्रन्थः कृतो विश्व-लोकानां शान्तिकारकः ॥४२१॥
भूपालस्य कृता पीडा, मया तत्पापशुद्धये
प्रायश्चित्तं कृतं पूर्णं, दयाग्रन्थे कृते शुभे ॥४२२॥
अहिंसाधर्मसद्बुद्ध्या, दयाग्रन्थे कृते सति
विश्वस्मिन्सर्वलोकेषु, दयाबुद्धिः प्रवर्धताम् ॥४२३॥
सर्वविश्वस्थलोकानां, दयाचारविवृद्धये
दयया विश्वशान्त्यर्थं, दयाग्रन्थः प्रकाशताम् ॥४२४॥
खसिद्धिग्रहचन्द्राङ्के (१९८०) मिते विक्रमवत्सरे
मार्गशुक्लद्वितीयायां, रवौ हि शुभभावतः ॥४२५॥
कृतः पूर्णो दयाग्रन्थो, बुद्धिसागरसूरिणा
मया च तद्दिने प्रीत्या, घंटाकर्णस्य मन्दिरे ॥४२६॥
घंटाकर्णस्य वीरस्य, प्रतिष्ठा च कृता मया
मधुपुर्यां (महुडी) स्थितिं कृत्वा, बुद्धिसागरसूरिणा ॥४२७॥
शर्मास्तु सर्वविश्वस्य, दयाधर्मस्य सत्प्रसादात्
शान्तिस्तुष्टिश्च पुष्टिश्च, भवन्तु सर्वदेहिनाम् ॥४२८॥
ॐ अर्हं श्रीमहावीरः, सर्वज्ञः परमेश्वरः
दयाधर्मप्रचारेण, कुर्याद्विश्वस्य मङ्गलम् ॥४२९॥

ॐ अर्हं महावीर शान्तिः ३

विश्वास आत्मन्युदितोऽस्ति यस्य,
स जैनभक्तो मम निश्चयेन ।
अस्त्याऽऽत्मनि सत्यसुखं विशालं,
सर्वं हि दुःखं जडमोहतोऽस्ति ॥ ६ ॥
स्वर्गो मनो यद्वशमाऽऽत्मनोऽस्ति,
मुक्तिर्भवेदाऽऽत्मवशं मनश्चेत् ।
मृते मनस्यस्ति समग्रमुक्ति-
र्मनोजयत्वेन भवेद्विमुक्तिः ॥ ७ ॥
यावद्भवेच्चञ्चलता स्वचित्ते,
संसारमध्ये भ्रमणं च तावत् ।
रागाद्यधीनं च यतोऽस्ति चित्तं,
स्वप्नेऽपि नो तत्र सुखोद्भवः स्यात् ॥ ८ ॥
समग्रविश्वस्य भवेदधीश-
स्तथाऽपि शान्तिं लभते न किंचित् ।
मनुष्य आशानुचरोऽस्ति याव-
त्सुखी न तावत्स विनिश्चयेन ॥ ९ ॥
जिगाय चित्तं स जिगाय विश्वं,
दुःखं तु चेतोजयमन्तरा स्यात् ।
मनोवशः कोऽपि भवेन्मनुष्यो-
जगत्सु शान्तिं लभते न कांचित् ॥ १० ॥
मोहस्य यावद्वशमस्ति चित्तं,
शक्रादयः स्युः सुखिनो न तावत् ।
तमोरजःसत्त्वगुणाश्रयःस्या-
त्तावज्जिनः स्यान्न च कोऽपि जीवः ॥ ११ ॥

पृथक् चल त्वं व्यवहारनीत्या,
निर्लेपतश्चाऽऽत्मनि मोदमानः।
प्रवर्तते स्याऽऽत्मनि सर्वधर्मो-
निर्लेपतः कर्म कुरुष्व सर्वम् ॥ १८ ॥
विनाऽऽत्मना नास्ति जडेन शान्ति-
र्मिथ्याभ्रमं वारय सर्वमेतम्।
न त्वं प्रमादी जडपर्यये स्या-
गर्वी नचा स्या धनसत्तया त्वम् ॥ १९ ॥
सम्बन्धिनो ये स्वजनाश्च वर्गा-
नराञ्स्त्रियः पश्यसि यांस्त्वमित्थम्।
पर्यायतस्ते परिवर्तमाना-
मुह्यन्ति नो ज्ञानिजनाश्च तत्र ॥ २० ॥
त्वमाशु हे श्रेणिक चेत चेत,
कालःस्ववेगं शिरसि प्रदत्ते।
कालोऽपि नाऽऽत्मानमहो भुनक्ति,
स्यादाऽऽत्ममोदेन सुखं यथार्थम् ॥ २१ ॥
आत्मा स एवास्ति जिनः पराऽऽत्मा,
दीनं निजं मानय मा कदाचित्।
आत्मा त्रिलोकस्य परेश्वरोऽस्ति,
स्वान्ते परेशं प्रविलोकय त्वम् ॥ २२ ॥
स्याद् द्वेषरागप्रशमेन बुद्धः
शुद्धो भवेत्सत्यमयं निजाऽऽत्मा।
विनाऽऽत्मना न त्वमसि द्वितीयः
प्रेम्णेतिवाक्यं मम मानय त्वम् ॥ २३ ॥

पृथक् चल त्वं व्यवहारनीत्या,
निर्लेपतश्चाऽऽत्मनि मोदमानः।
प्रवर्तते स्वाऽऽत्मनि सर्वधर्मो-
निर्लेपतः कर्म कुरुष्व सर्वम् ॥ १८ ॥

विनाऽऽत्मना नास्ति जडेन शान्ति-
र्मिथ्याश्रमं वारय सर्वमेतम्।
न त्वं प्रमादी जडपर्यवे स्या-
गर्वी नवा स्या धनसत्तया त्वम् ॥ १९ ॥

सम्बन्धिनो ये स्वजनाश्च वर्गा-
नरान्स्त्रियः पश्यसि यांस्त्वमित्थम्।
पर्यायतस्ते परिवर्तमाना-
मुह्यन्ति नो ज्ञानिजनाश्च तत्र ॥ २० ॥

त्वमाशु हे श्रेणिक चेत चेत,
कालःस्ववेगं शिरसि प्रदत्ते।
कालोऽपि नाऽऽत्मानमहो भुनक्ति,
स्यादात्ममोदेन सुखं यथार्थम् ॥ २१ ॥

आत्मा स एवास्ति जिनः पराऽऽत्मा,
दीनं निजं मानय मा कदाचित्।
आत्मा त्रिलोकस्य परेश्वरोऽस्ति,
स्वान्ते परेशं प्रविलोकय त्वम् ॥ २२ ॥

स्याद् द्वेषरागप्रशमेन बुद्धः
शुद्धो भवेत्सत्यमयं निजाऽऽत्मा।
विनाऽऽत्मना न त्वमसि द्वितीयः
प्रेम्णेतिवाक्यं मम मानय त्वम् ॥ २३ ॥

देसर्वं च शुभाशुभं य-
मं तत्र भवेन्न गर्वः ।
एष प्रकृतेर्हि सर्वः,
तद्विद्धि निजाऽऽत्मभिन्नम् ॥ २६ ॥
पतो यो व्यवहार एष,
ऽऽत्मधर्म न च विद्धि सारम् ।
र भावा हि शुभाशुभाख्या-
त्यभावो हि ततोऽयमात्मा ॥ २७ ॥
नारोपितमस्त्यसत्यं,
नैनस्तत्र वदन्ति किञ्चित् ।
ाते दुःखसुखे मनोभि-
नेनो नाम विदन्ति मिथ्या ॥ १८ ॥
त्मका ज्ञानिजना भवन्ति,
त्मनः श्रेणिक विद्धि नीतिम् ।
गादिविकल्पकात्स्मात्,
संसारनिदानभूतात् ॥ १९ ॥
गस्य च बुद्धिभिन्नं,
न्नं विद्धि जिनं नरेन्द्र ।
रागत्यजनेन सौख्यं,
तं न ततोऽस्ति सौख्यम् ॥ २० ॥
ो देवजनाश्च जीवाः,
ताऽपि तु पामरा हि ।

राज्यं तु शुद्धाऽऽत्मनि सत्यमस्ति,
त्वं सर्वनीत्या कुरु सर्वकार्यम् ।
मा रक्षय त्वं परमाणुकांक्षां,
त्वं स्वादयाऽऽत्मानुभवस्य सौख्यम् ॥ ३० ॥
उद्धारयाऽऽत्मानमिहाऽऽत्मना त्वं,
रागं कुरु स्वाऽऽत्मनि पूर्णपूर्णम् ।
अहंत्ववृत्त्याऽस्ति तु कर्मबन्धो-
निर्मोहतः स्यादविनाश आत्मा ॥ ३१ ॥
कालत्रयेऽप्यस्ति स नित्य आत्मा,
स्वाऽऽत्मा चिदानन्दमयः पवित्रः ।
एवं त्वमाऽऽत्मानमवेहि बन्धो,
स्वतःस्वमुद्धारय भारतेश ॥ ३२ ॥
पूर्णश्चिदानन्दमयः पवित्रो,
देहोऽस्त्यनित्यःखलु वस्त्रतुल्यः ।
स्वंकर्मरूपं नच पश्य भूप,
भ्रान्त्या च कर्मादिकमत्र पश्य ॥ ३३ ॥
भ्रान्तौ गतायां स्वयमस्त्यबन्धः
कर्मादिकानां न भवेद्यबन्धः ।
मोहो महीयान् खलु कर्ममूलं,
भ्रान्तौ गतायां न भवेद्भ्रमश्च ॥ ३४ ॥
मोहे विनष्टे खलु शुद्धआत्मा,
बुद्धोजिनोऽर्हन्प्रभुरस्ति साक्षात् ।
लिङ्गं न जातिर्भवदाऽऽत्मनोऽस्ति,
सर्वस्य विश्वस्य परेश्वरोऽस्ति ॥ ३५ ॥

विहाय चिन्तामनवाप्नुवन्तो,
सदाऽनुरक्तो समतां भजस्व ।
मैत्रैव ते शुद्धमति र्भवित्री,
सर्वोऽपि रागात्मगुणोऽनुभावः ॥ ४२ ॥
शुद्धोपयोगश्च निजाऽऽत्मधर्मो-
ऽनात्मरागस्य मनः प्रयाति ।
रागोऽस्ति कश्चिन्न निजाऽऽत्मतत्त्वे,
त्यागोऽस्तिकश्चिन्ननिजाऽऽत्मधर्मे ॥ ४३ ॥
त्यागं च वैराग्यमथानुरागं,
चित्तोत्थितं वीक्ष्य च जागृहि स्वम् ।
मनोमृतौ नश्यति चित्तधर्मो-
निजाऽऽत्मरूपे तु विभाति नित्यम् ॥ ४४ ॥
मनादितश्चास्ति तु भिन्न आत्मा,
निमित्तधर्मोऽपि मनोऽस्ति भिन्नः ।
आत्माऽस्त्यरूपी मम चिद्घनश्च,
वर्णादयः सन्ति न तस्य रूपम् ॥ ४५ ॥
जडेष्वहंभाव उदेति याव-
त्तावन्न पूर्णा समुदेति शान्तिः ।
जडेष्वहंभाव उदेति नो चे-
त्तदा स आत्मा प्रविभाति मुक्तः ॥ ४६॥
अहंक्रियातो भवति भ्रमश्च,
ज्ञेयश्चधर्मो निरहंक्रियातः ।
जडेषु कोप्यस्ति न चाऽऽत्मधर्मो,
दुःखं लयं याति निजाऽऽत्मबोधात् ॥ ४७ ॥

अस्त्याऽऽत्मबोधस्य विशालशक्तिः
कर्माणि तिष्ठन्ति न चैतदग्रम् ।
दुःखे सुखे चापि विभाति साम्यं,
न भोगराशिः समुदेति तत्र ॥ ५४ ॥

कदानिजाऽऽत्माभिमुखंमनःस्या-
त्तदा न भोगेषु रसग्रहः स्यात् ।
यतो निजाऽऽत्मा परिणामशुद्धः
प्रवेद्यते तत्र च पूर्णबुद्धः ॥ ५५ ॥

न मुच्यते ज्ञानिजनस्य भोगो,
जन्मान्तरोपार्जितकर्मयोगात् ।
तथापि भोगेषु न रागरोषौ,
स्यातामबन्धश्च पुनस्तदाऽऽत्मा ॥ ५६ ॥

साक्षीन्द्रियेष्वस्ति मनस्सु चाऽऽत्मा,
प्रवर्तते स्वे विषये स साक्षी ।
कुर्यात्समग्रं तु सलक्ष्यमाऽऽत्मा,
प्रवर्ततेऽध्यक्षमयाऽऽत्ममोदात् ॥ ५७ ॥

अनन्तशक्त्याकर एष आत्मा,
यत्नेन निष्काममथोपयोगैः ।
किम्वा भवेन्मोहविषं तदभ्रे,
ज्ञानी जनधेनमिह दृष्ट एव ॥ ५८ ॥

कुर्यात्क्रियां किन्तु न कर्मबन्धो-
ज्ञानिजनो भोग्यपि नैव भोगी ।
न बध्यते ज्ञानिजनो जडस्तु,
किन्तुर्दिनेशाभिमुखं समांसि ॥ ५९ ॥

अस्त्याऽऽत्मबोधस्य विशालशक्तिः
कर्माणि तिष्ठन्ति न चैतदग्रम्।
दुःखे सुखे चापि विभाति साम्यं,
न भोगराशिः समुदेति तत्र ॥ ५४ ॥

कदानिजाऽऽत्माभिमुखंमनःस्या–
त्तदा न भोगेषु रसग्रहः स्यात्।
यतो निजाऽऽत्मा परिणामशुद्धः
प्रवेद्यते तत्र च पूर्णबुद्धः ॥ ५५ ॥

न मुच्यते ज्ञानिजनस्य भोगो,
जन्मान्तरोपार्जितकर्मयोगात्।
तथापि भोगेषु न रागरोषौ,
स्यातामपन्यश्च पुनस्तदाऽऽत्मा ॥ ५६ ॥

साक्षीन्द्रियेष्वस्ति मनस्सु चाऽऽत्मा,
प्रवर्तते स्वे विषये न साक्षी।
कुर्वीत्यसर्वं तु मनःस्वयमाऽऽत्मा,
प्रवर्ततेऽध्यक्षमथाऽऽत्ममोदात् ॥ ५७ ॥

अनन्तशास्त्राकर एष आत्मा,
यत्नेन निष्काममथोपयोगैः।
क्रिया सर्वमोहविषं तदर्थे,
ज्ञानी जनश्चेतसि हृष्ट एव ॥ ५८ ॥

कुर्वन्क्रियां किन्तु न कर्मबन्धो–
ज्ञानिजनो भोगवति नैव भोगी।
न बध्यते ज्ञानिजनो जगत्सु,
किन्तुर्दिने ज्ञानिमुखं समाधि ॥ ५९ ॥

अस्त्याऽऽत्मबोधस्य विशालशक्तिः
कर्माणि तिष्ठन्ति न चैतदग्रम् ।
दुःखे सुखे चापि विभाति साम्यं,
न भोगराशिः समुदेति तत्र ॥ ५४ ॥

कदानिजाऽऽत्माभिमुखंमनःस्या-
त्सदा न भोगेषु रसग्रहः स्यात् ।
यतो निजाऽऽत्मा परिणामशुद्धः
प्रवेद्यते तत्र च पूर्णबुद्धः ॥ ५५ ॥

न मुच्यते ज्ञानिजनस्य भोगो,
जन्मान्तरोपार्जितकर्मयोगात् ।
तथापि भोगेषु न रागरोषौ,
स्यातामबन्धश्च पुनस्तदाऽऽत्मा ॥ ५६ ॥

साक्षीन्द्रियेष्वस्ति मनस्सु चाऽऽत्मा,
प्रवर्तते स्वे विषये स साक्षी ।
कुर्वीत्समग्रं तु सलक्ष्यमाऽऽत्मा,
प्रवर्ततेऽध्यक्षमथाऽऽत्ममोदात् ॥ ५७ ॥

अनन्तशक्त्याकर एष आत्मा,
वर्तेत निष्काममयोगयोगैः ।
क्रिया भवेन्मोहविधे सदैव,
ज्ञानी जनश्चेतसि दृष्ट एव ॥ ५८ ॥

कुर्वीन्क्रियां किन्तु न कर्मबन्धो-
ज्ञानिजनो भोगमपि नैव भोगी ।
न बध्यते ज्ञानिजनो ऽहंस्तु,
किन्तुर्दिनान्यपि नु समानि ॥ ५९ ॥

यत्कालतः स्याच्च निजाऽऽत्मबोध,
आत्मोपयोगोऽपि ततो हि कालात् ।
विनाशयेत्कर्मफलं ततो हि,
स्यादल्पबन्धो बहुनिर्जरा च ॥ ७२ ॥

ततो हि कालाद् बहुनिर्जराः स्युः,
स्यात्कर्मबन्धः परमल्प एव ।
सर्वा हि कर्मप्रकृतिः प्रयाति,
पूर्णा भवेत्तत्र निजाऽऽत्मशुद्धिः ॥ ७३ ॥

यत्कालतः स्याच्च निजाऽऽत्मबोध-
स्तत्कालमात्राऽऽत्मरसस्य पानम् ।
ज्ञाने च भक्तौ मन आशु मग्नं,
भवेत्तनौ सत्यपि मुक्तिसौख्यम् ॥ ७४ ॥

देवोऽस्यामाऽऽत्माय तनुमंदिरे च,
सेव्यस्य मे तीर्थशिरोमणि स्वम् ।
कुरुष्व हे श्रेणिक कर्म सर्वं,
स्याः किन्तु निष्काम इतोऽमरे स्वम् ॥ ७५ ॥

कौलेयको लेढि यथाऽस्थिखण्डं,
मनोऽपि तद्वद्विषयांश्च लेढि ।
निलेप रक्तं च यथाऽस्थिलेहे,
भोगे तथाऽऽसक्तिकरोऽस्ति जीवः ॥ ७६ ॥

पयोधिनं विक्रि च कामधेनुं,
ततः सदा क्लेशपरम्पराऽस्ति,
जीवा भ्रमन्त्येव च कामलुब्धा-
दुःखस्य मार्गे मनुजा लभन्ते ॥ ७७ ॥

ददाति कर्मप्रकृतिः सहायं,
पातो भवेद्येन न चोर्ध्वगानाम् ।
भूत्वा स पश्चाच्च पुरः प्रयाति,
भूत्वैकशुद्धो लभते स्वसिद्धिम् ॥ ६६ ॥
प्रवर्तते ज्ञानिजनो जगत्सु,
तथापि कुत्रापि न बध्यतेऽसौ ।
सम्यग्मते श्रेणिक राजराज,
सम्यक् च सर्वं तव भारतेश ॥ ६७ ॥
स्यात्सम्वरः श्रेणिक आस्रवोपि,
स्याज्ज्ञानिनां वस्त्वखिलं हि सम्यक् ।
अस्तीदृशी ज्ञानवतां तु शक्ति-
र्थितेषु नाऽऽसक्तिरुदेति यस्याः ॥ ६८ ॥
मिथ्यात्वशास्त्रं प्रभवेच्च यत्र-
त्सम्यक्त्वजीवेषु तदस्ति सम्यक् ।
मिथ्यात्विनां ग्रन्थचयोऽपि सम्यग,
मिथ्यात्वभावं लभते स नूनम् ॥ ६९ ॥
मिथ्यात्विनो मूढजनाश्च ये स्युः
स्यात् सम्वरो ह्यास्रवकृद्धि तेषाम् ।
ये हेतवः सन्ति भवाब्धिमुक्तौ,
ते बन्धनार्थं प्रभवन्ति तेषाम् ॥ ७० ॥
विनाऽऽत्मबोधं सकलं हि मिथ्या,
रौद्रो यथा निर्जनकाननेषु ।
देहस्य चित्तस्य च याः क्रियाःस्यु-
र्गुणाय ताः सन्ति निजाऽऽत्मबोधात् ॥ ७१ ॥

यत्कालतः स्याद्धनिजाऽऽत्मबोध,
आत्मोपयोगोऽपि ततो हि कालात् ।
विनाशयेत्कर्मफलं ततो हि,
स्यादल्पबन्धो बहुनिर्जराश्च ॥७२॥

ततो हि कालाद् बहुनिर्जराःस्युः,
स्यात्कर्मबन्धः परमल्प एव ।
सर्वा हि कर्मप्रकृतिः प्रयाति,
पूर्णा भवेत्तत्र निजाऽऽत्मशुद्धिः ॥ ७३ ॥

यत्कालतः स्याद्धनिजाऽऽत्मबोध-
स्तत्कालतश्चाऽऽत्मरतस्य ध्यानम् ।
ज्ञाने च भक्तौ तत आशु सक्तो,
भवेत्ततो यस्यपि मुक्तिसौख्यम् ॥ ७४ ॥

देवोऽस्यात्माऽऽत्माय तनुर्मन्दिरं च,
सेव्यश्च सं तीर्थशिरोमणि स्वयम् ।
कुरुष्व हे श्रेणिक धर्म सर्वं,
स्याः किन्तु निष्काम इतोऽन्तरं स्वयम् ॥ ७५ ॥

कौशेयको वेष्टि यथाऽऽत्मखण्डं,
ततोऽपि तद्वद्विषयैश्च वेष्टि ।
लिप्येत रक्तः न यथाऽस्थिरेणैः,
भोगे तथाऽऽसक्तिकरोऽस्ति जीवः ॥ ७६ ॥

यतोऽधिकं विद्धि च कामचेष्टा,
ततः सदाधर्मेऽपरम्पराऽस्ति,
जीवा भ्रमन्त्येव च कामलुब्धा-
दुःखाय सान्ते मनुजा लभन्ते ॥ ७७ ॥

ददाति कर्मप्रकृतिः महार्घं,
पातो भवेत्येन न चोर्ध्वगानाम् ।
भूत्वा स पश्चाच्च पुरः प्रयाति,
भूत्वैकशुद्धो लभते स्वसिद्धिम् ॥ ६६ ॥
प्रवर्तते ज्ञानिजनो जगत्सु,
तथापि कुत्रापि न बध्यतेऽसौ ।
सम्यग्मते श्रेणिक राजराज,
सम्यक् च सर्वं तव भारतेश ॥ ६७ ॥
स्यात्सम्वरः श्रेणिक आस्रवोपि,
स्याज्ज्ञानिनां वस्त्वखिलं हि सम्यक् ।
अस्तीदृशी ज्ञानवतां तु शक्ति-
श्चित्तेषु नाऽऽसक्तिरुदेति यस्याः ॥ ६८ ॥
मिथ्यात्वशास्त्रं प्रभवेच्च यत्र-
त्सम्यग्ज्ञजीवेषु तदस्ति सम्यक् ।
मिथ्यात्विनां ग्रन्थचयोऽपि सम्यग,
मिथ्यात्वभावं लभते स नूनम् ॥ ६९ ॥
मिथ्यात्विनो मूढजनाश्च ये स्युः
स्यात् सम्वरो प्यास्रवकृद्धि तेषाम् ।
ये हेतवः सन्ति भवाब्धिमुक्तौ,
ते बन्धनार्थं प्रभवन्ति तेषाम् ॥ ७० ॥
विनाऽऽत्मबोधं सकलं हि मिथ्या,
रोदो यथा निर्जनकाननेषु ।
देहस्य चित्तस्य च याः क्रियाःस्यु-
र्गुणाय ताः सन्ति निजाऽऽत्मबोधात् ॥ ७१ ॥

यत्कालतः स्याच्च निजाऽऽत्मबोध,
आत्मोपयोगोऽपि ततो हि कालात् ।
विनाशयेत्कर्मफलं ततो हि,
स्यादल्पबन्धो बहुनिर्जरा च ॥ ७२ ॥
ततो हि कालाद् बहुनिर्जराः स्युः,
स्यात्कर्मबन्धः परमल्प एव ।
सर्वा हि कर्मप्रकृतिः प्रयाति,
पूर्णा भवेत्तत्र निजाऽऽत्मशुद्धिः ॥ ७३ ॥
यत्कालतः स्याच्च निजाऽऽत्मबोध
स्तत्कालमात्राऽऽत्मरसस्य पानम् ।
ज्ञाने च भक्ती मन आशु सक्तं,
भवेत्ततो यस्यपि मुक्तिगाम्यम् ॥ ७४ ॥
देवोऽस्यमाऽऽत्माय मनुजदेहे च,
सेयस्य तं तीर्थशिरोमणि स्यात् ।
कुरुष्व हे धीधन कर्म सर्वं,
स्याः किन्तु निष्काम इतोऽन्तरे स्यात् ॥ ७५ ॥
कौलेयको लेढि यथास्थिखण्डं,
मनोऽपि तद्वद्विषयांश्च लेढि ।
मिलेत्स्वरक्तं च यथाऽस्थिखण्डे,
भोगे तथाऽऽसक्तिकरोऽस्ति जीवः ॥ ७६ ॥
पलोपमं विद्धि च कामभोगं,
ततः सदा क्लेशपरम्पराऽस्ति,
जीवा भ्रमन्त्येव च कामलुब्धा-
दुःखस्य मार्गे मनुजा लभन्ते ॥ ७७ ॥

ददाति कर्मप्रकृतिः सहायं,
पातो भवेत्तेन न चोर्ध्वगानाम् ।
भूत्वा स पश्चाच पुरः प्रयाति,
भूत्वैकशुद्धो लभते स्वसिद्धिम् ॥ ६६ ॥
प्रवर्तते ज्ञानिजनो जगत्सु,
तथापि कुत्रापि न बध्यतेऽसौ ।
सम्यग्मते श्रेणिक राजराज,
सम्यक् च सर्वं तव भारतेश ॥ ६७ ॥
स्यात्सम्वरः श्रेणिक आस्रवोपि,
स्याज्ज्ञानिनां वस्त्वखिलं हि सम्यक् ।
अस्तीदृशी ज्ञानवतां तु शक्ति-
र्विषयेषु नाऽऽसक्तिरदेति यस्याः ॥ ६८ ॥
मिथ्यात्वशास्त्रं प्रभवेच्च यच-
त्सम्यक्त्वजीवेषु तदस्ति सम्यक् ।
मिथ्यात्विनां ग्रन्थचयोऽपि सम्यग्,
मिथ्यात्वभावं लभते स नूनम् ॥ ६९ ॥
मिथ्यात्विनो मूढजनाश्च ये स्युः
स्यात् सम्वरो प्यास्रवकृद्धि तेषाम् ।
ये हेतवः सन्ति भवाब्धिमुक्तौ,
ते बन्धनार्थं प्रभवन्ति तेषाम् ॥ ७० ॥
विनाऽऽत्मबोधं सकलं हि मिथ्या,
रोदो यथा निर्जनकाननेषु ।
देहस्य चित्तस्य च याः क्रियाः स्यु-
र्गुणाय ताः सन्ति निजाऽऽत्मबोधात् ॥ ७१ ॥

यत्कालतः स्याच्च निजाऽऽत्मबोध,
आत्मोपयोगोऽपि मतो हि कालात् ।
विनाशयेत्कर्मफलं मतो हि,
स्यादल्पबन्धो बहुनिर्जरा च ॥७२॥
ततो हि कालाद् बहुनिर्जराः स्युः,
स्यात्कर्मबन्धः परमल्प एव ।
सर्वा हि कर्मप्रकृतिः समाप्ति,
पूर्णा भवेत्तत्र निजाऽऽत्मशुद्धिः ॥ ७३ ॥
यत्कालतः स्याच्च निजाऽऽत्मबोध-
स्तत्कालमध्याऽऽत्मरसस्य पानम् ।
ज्ञाने च भक्तौ मन आशु मग्नं,
भवेत्ततो स्यादपि मुक्तिसौख्यम् ॥ ७४ ॥
देवोऽस्त्यमाऽऽत्माय चतुर्मंदिरे च,
सेवस्व तं तीर्थशिरोमणिं त्वम् ।
कुरुष्व हे धैर्णिक कर्म सर्वं,
स्याः किन्तु निर्वाण इतोऽन्तरं त्वम् ॥ ७५ ॥
कौलेयको लेढि यथास्थिखण्डं,
यतोऽपि तद्वद्विषयांश्च लेढि ।
खिद्येत रक्तः च यथाऽस्थिलेहे,
भोगे तथाऽऽत्मविकरोऽस्ति जीवः ॥ ७६ ॥
यतोऽर्थितं विद्धि च कामभोगा,
ततः सदाखेदपरम्पराऽस्ति,
जीवा भवन्त्येव च कामलुब्धा-
दुःखाय सान्ते मनुजा लभन्ते ॥ ७७ ॥

कामादयः सन्ति हि दुःखमूलं,
भ्रान्त्या न तेषु भ्रम भारतेश।
रागं विना यत्र भवेच्च भोगी,
नास्त्याऽऽत्मनस्तत्र च कर्मबन्धः ॥ ७८ ॥
कुर्वन्ति निष्कामधिया नरा वा,
स्त्रियश्च सर्वव्यवहारमेव।
जीवन्विमुक्तः खलु तत्र सत्यं,
सर्वक्रिया चेदुपयोगतः स्यात् ॥ ७९ ॥
दयाविलीनं मन आत्मनि स्या-
दाऽऽत्मा जिनः स्यात्स च वीतरागः।
भूते सति स्वाऽऽत्मभवैकताने,
भवेद्ध्रुवं तत्र च मुक्तिमानम् ॥ ८० ॥
स्युर्ज्ञानिनां चेतसि सर्वधर्माः,
कुर्वन्ति यत्कर्म भवेत्स्वयोग्यम्।
यत्कर्म योग्यं खलु यत्र काले,
कुर्वन्ति ते योग्यमुपायमेत्य ॥ ८१ ॥
धर्मोऽस्तिसज्ज्ञानिजनान्तिकेषु,
शर्माऽस्त्यपि ज्ञानिजनस्य पार्श्वे।
स सर्वकर्माशयमाशु विद्याद्,
व्रजेन्न पश्चाद् भ्रमितो न च स्यात् ॥ ८२ ॥
भवेत्स्वतंत्रो व्यवहारकार्ये,
वाक्कायचित्तानि वशानि यस्य।
चतुर्विधश्चेदशजैनसंघः
सर्वोन्नतिं स्वांहि सुखेन विन्ते ॥ ८३ ॥

यहाऽऽत्मनि श्रेणिक चाऽऽत्मधर्मं,
परिष्कुरुष्वाऽखिलराज्यनीतीः ।
दुःखं प्रजानां च निवारय त्वं,
प्रजोन्नतिर्यत्र ततो हि धर्मः ॥ ९० ॥
सर्वप्रजाः स्वाऽऽत्मसमाःप्रविद्धि,
न्यायेन राज्यं गुणवन्कुरुष्व ।
दुष्टानरिपून्दण्डय भूप राज्ये,
दूरीकुरु त्वं दुरुपद्रवाँश्च ॥ ९१ ॥
सर्वप्रजानां च कुरुष्व रक्षां,
सेवाख्यधर्मं वह भूप रागैः ।
ज्ञानप्रचारं च कुरु प्रजासु,
कुरुष्व दुष्टव्यसनाभिघातम् ॥ ९२ ॥
वश्यान्सदाशत्रुजनान्कुरु त्वं,
सत्यांप्रियां ब्रूहि नरेन्द्रवाणीम् ।
मा धत्स्व राज्यादिकृतां महत्तां,
स्वप्नेऽपि नो भूप कुरुष्व गर्वम् ॥ ९३ ॥
त्वं सर्ववर्णान्स्वसमान वेद्वि,
नयाऽप्रमानं कुरु सन्मुनीनाम् ।
नीत्या रहस्यं सकलं विदित्वा,
प्रचारय त्वं च मदुक्तनीतिम् ॥ ९४ ॥
स्वप्नेऽपि न त्वं कुरु पक्षपातं,
लोभादिकं वारय संभयन्नम् ।
स्मृत्वा च मां गच्छ नरेन्द्र सत्वां,
गुणज्ञ जीवेषु यहानुरागम् ॥ ९५ ॥



सर्वसमानं खलु जैनराज्ये,
गुणज्ञ! चैवं परमार्थराज्यम्।
वर्णादिधर्मानपि पोषय त्व-
मन्यायतो नापि कुरुष्व रोषम् ॥ १०२ ॥

सर्वत्र देशे सुखिनो जना ये,
ते जैनधर्म नियतं भजन्ति।
भक्तिर्मदीया समुदेति यत्र,
श्रीमेघवृष्ट्यादि सुखं ततोऽस्ति ॥ १०३ ॥

दुष्टा जना यत्र न चापि नीति-
रधर्म्ययुद्धैःकलहोऽस्ति नत्र।
हिंसाश्च पापानि भवन्ति यत्र,
नश्यन्ति ते श्रेणिक राजदेशाः ॥ १०४ ॥

मद्वाक्यधिकार उदेति यत्र,
स्युर्दुःखिनस्तत्र नराः स्त्रियश्च।
तत्रास्ति शान्तिर्मम यत्र भक्ति-
र्योगस्य हार्दे समुदेति तत्र ॥ १०५ ॥

श्रीजैनधर्मेण समो न कश्चि-
त्ततो द्वितीया सकलेऽप्यधस्थाः,
श्रीजैनधर्मोऽस्ति निजाऽऽत्मधर्म-
स्ततो भवत्येव समग्रशर्म ॥ १०६ ॥

तमोरजोवृत्तिमपाकुरु त्वं,
संरक्ष भोः सात्त्विककर्मवृत्तिम्।
श्रीजैनधर्मो व्यवहारतोऽयं,
सर्वत्र लोकेषु सुखालयोऽयम् ॥ १०७ ॥

तस्मिँश्चिदानन्दमयः स्वधर्मो-
मोहादयो यत्र न सम्भवन्ति ।
शुद्धाऽऽत्मधर्मोऽस्त्ययमेव नूनं,
जानीह्युपादानत एव मर्म ॥ १०८ ॥
सर्वस्य संघस्य कुलस्य तेषां,
प्रीत्या भव श्रेणिक राजराज ।
ज्ञात्वा परेषां सफलं स्वधर्मं,
तथैव धर्मं सफलं च विद्धि ॥ १०९ ॥
सर्वत्र संघे विहिते च रागे,
त्यागाश्रयस्त्वयमुदेति नूनम् ।
हृद्वाग्वपुःशान्तिमुदीर्य सर्वं,
निजाऽऽत्मशुद्धिं हृदि भावय त्वम् ॥ ११० ॥
यावाऽन्तरा एव समयप्रणीतिः,
कदाऽपि कुर्या नहि भूप ! गर्वम् ।
निःशालिको यःकुरुतेऽनिशं,
नरो भवेदाऽऽत्म गुणेश्च दीनः ॥ १११ ॥
हानिं च लाभं प्रविचार्य चित्ते,
कर्माणि कर्तुं पर निश्चयं त्वम् ।
आज्ञां मदीयां प्रतिपाल्य सर्वं,
भावेन स्वयः स्वस्य हृदा आत्मा ॥ ११२ ॥
धर्मोपदेशाऽऽचरणं कुरुष्व,
गाम्भीरशब्दामरंद इति पूर्णः ।
मोहादिकं वारय आयमाश,
समन्तभूपं स्व होवतालित ॥ ११३ ॥

वशं.कुरोतिव्यसनस्य माभूः,
शक्रादयो मोहवशा हि दीनाः ।
स्वतन्त्रतायां निजराज्यमस्ति,
त्याज्याश्च सर्वे व्यसनस्य दोषाः ॥ ११४ ॥
वर्तस्व चैवं दृढनिश्चयेन,
स्वतन्त्रमुक्तेरियमस्ति युक्तिः ।
आत्मोपयोगेन यतो निजाऽऽत्मा,
प्रवर्तते तत्र हि सर्वयोगः ॥ ११५ ॥
प्रवर्तते चाऽऽत्मवशं मनश्चेत्,
सर्वे हि धर्माः सहसोद्भवन्ति ।
आत्मप्रकाशं शृणु निश्चयेन,
सर्वप्रकाशोपरि सुप्रकाशम् ॥ ११६ ॥
